श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये द्वाविंशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये द्वाविंशं दशकम् ॥

## अजामिलोपाख्यानम्

अजामिलो नाम महीसुरः पुरा
चरन् विभो धर्मपथान् गृहाश्रमी।
गुरोर्गिरा काननमेत्य दृष्टवान्
सुधृष्टशीलां कुलटां मदाकुलाम् ॥ 22.1 ॥

स्वतः प्रशान्तोऽपि तदाहृताशयः
स्वधर्ममुत्सृज्य तया समारमन्।
अधर्मकारी दशमी भवन् पुन -
र्दधौ भवन्नामयुते सुते रतिम् ॥ 22.2 ॥

स मृत्युकाले यमराजकिङ्करान्
भयङ्करांस्त्रीनभिलक्षयन् भिया।
पुरा मनाक् त्वत्स्मृतिवासनाबला -
ज्जुहाव नारायणनामकं सुतम् ॥ 22.3 ॥

दुराशयस्यापि तदात्वनिर्गत -
त्वदीयनामाक्षरमात्रवैभवात्।
पुरोऽभिपेतुर्भवदीयपार्षदा -
श्चतुर्भुजाः पीतपटा मनोरमाः ॥ 22.4 ॥

अमुं च सम्पाश्य विकर्षतो भटान्
विमुञ्चतेत्यारुरुधुर्बलादमी।

निवारितास्ते च भवज्जनैस्तदा
    तदीयपापं निखिलं न्यवेदयन् ॥ **22.5** ॥

भवन्तु पापानि कथं तु निष्कृते
    कृतेऽपि भो दण्डनमस्ति पण्डिताः।
न निष्कृतिः किं विदिता भवादृशा -
    मिति प्रभो त्वत्पुरुषा बभाषिरे ॥ **22.6** ॥

श्रुतिस्मृतिभ्यां विहिता व्रतादयः
    पुनन्ति पापं न लुनन्ति वासनाम्।
अनन्तसेवा तु निकृन्तति द्वयी -
    मिति प्रभो त्वत्पुरुषा बभाषिरे ॥ **22.7** ॥

अनेन भो जन्मसहस्रकोटिभिः
    कृतेषु पापेष्वपि निष्कृतिः कृता।
यदग्रहीन्नाम भयाकुलो हरे -
    रिति प्रभो त्वत्पुरुषा बभाषिरे ॥ **22.8** ॥

नृणामबुद्ध्यापि मुकुन्दकीर्तनं
    दहत्यघौघान् महिमास्य तादृशः।
यथाग्निरेधांसि यथौषधं गदा -
    निति प्रभो त्वत्पुरुषा बभाषिरे ॥ **22.9** ॥

इतीरितैर्याम्यभटैरपासृते
    भवद्भटानां च गणे तिरोहिते।
भवत्स्मृतिं कञ्चन कालमाचरन्
    भवत्पदं प्रापि भवद्भटैरसौ ॥ **22.10** ॥

स्वकिङ्करावेदनशङ्कितो यम -
    स्त्वदङ्घ्रिभक्तेषु न गम्यतामिति।

स्वकीयभृत्यानशिशिक्षदुच्चकैः
    स देव वातालयनाथ पाहि माम् ॥ **22.11** ॥

॥ इति श्रीमन्नारायणीये द्वाविंशं दशकं समाप्तम् ॥